# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2019 - 20

**Class : VII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क – अपठित अवबोधनम् – 5
खण्डः ख – रचनात्मक कार्यम् – 15
खण्डः ग – अनुप्रयुक्त व्याकरणम् – 25
खण्डः घ – पठित अवबोधनम् – 35

## खण्डः क – अपठित अवबोधनम्

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अस्मिन् जगति सर्वेषां वस्तूनाम् अपेक्षया समयः अधिकं मूल्यवत् वस्तु अस्ति। विनष्टानि वस्तूनि पुनः अपि मानवः प्राप्नोति। परे विनष्टः समयः केनापि उपायेन पुनः प्राप्तुम् न शक्यते। यस्य आयुषः एकः अपि क्षणं निरर्थकं गतः सः गतः एव। अतः तथा प्रयतितव्यं यथा एकस्य अपि क्षणस्य दुरुपयोगः न स्यात् समस्तः एव समयः समुचितरूपेण व्यतीतः भवेत्। समयः कस्यापि प्रतीक्षां न करोति। अनेके जनाः द्यूते, विवादे, वृथाभ्रमणे, पिशुनतायां निद्रायां च समस्तं समयं नयन्ति। ते स्वजीवनस्य बहुमूल्यम् समयं वृथा यापयन्ति। समयस्य सदुपयोगः जीवनस्य सफलतायाः प्रथमं सोपानं, समुन्नतेः च मूलमन्त्रं वर्तते।

**I. एकपदेन उत्तरयत।** **2**

क. अस्मिन् जगति कः अधिकं मूल्यवत् वस्तु अस्ति?
ख. कीदृशानि वस्तूनि मानवः पुनः प्राप्नोति?

**II. पूर्णवाक्येन उत्तरयत।** **4**

क. अनेके जनाः कथं समस्तं समयं नयन्ति?
ख. जीवनस्य सफलतायाः मूलमन्त्रं किम् अस्ति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**IV. भाषिककार्यम्।** **3**

क. 'नयन्ति' इति क्रियायाः कर्तृपदम् किम्?
ख. 'विनष्टः समयः' अत्र विशेषणपदं किम्?

ग. 'दुरुपयोग:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

## खण्ड: ख – रचनात्मकं कार्यम्

**2. भवान् अर्णव:। स्वजन्मदिनस्य आयोजने स्वमित्रम् अनुरागं प्रति लिखिते पत्रे मञ्जूषात: उचितं पदं चित्वा पत्रं पूरयत।** **5**

मञ्जूषा

(आगमिष्यन्ति, अनुभविष्याम:, प्रतीक्षाम्, मिलित्वा, नमस्ते, प्रियमित्रम् परिवारेण, कुशलम्, प्रीतिभोज:, जन्मदिनम्)

पश्चिम–विहार

दिल्ली नगरम्

तिथि:– 18.01.2020

प्रियमित्र अनुराग

सप्रेम क. ---------

अत्र कुशलम्, तत्र अपि ख. -------- भवेत्।

अग्रिमे सप्ताहे गुरुवासरे सप्तम्यां तारिकायां मम ग. ------- अस्ति। सायंकाले षड्वादने गृहे घ. ---------- आयोजित:। सर्वे बन्धु – बान्धवा: उत्सवार्थम् ङ. ---------। आशा अस्ति त्वमपि च. -------- सह समारोहाय आगमिष्यसि। एतस्मिन् अवसरे वयम् सर्वे छ. --------- गास्याम:, नर्तिष्याम: उत्सवस्य च आनन्दम् ज. ---------।

अहम् तव आगमनस्य झ. ---------- करिष्यामि।

पितृभ्याम् मम प्रणामा:।

तव ञ. -----------

अर्णव:

**3. अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** **5**

मञ्जूषा

(छात्रा:, पुस्तकानि, वातायनानि, ग्रन्थपालक: सङ्गणकयन्त्रम्, उत्पीठिके, कपाटिका)



**4. अधोलिखित वाक्यानि संस्कृतभाषया अनूद्य लिखत।** **5**

क. I am going to temple.

ख. He is in his office.

ग. He sat under a tree.

घ. She is a beautiful girl.

ङ. Where is the chalk piece?

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**5. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा कुरुत।** **4**

क. तृषार्तः गजः जलं पिबति।

ख. वसुधैव कुटुम्बकम् ।

ग. एतेषां वर्णानाम् अन्यदपि महत्त्वम् किम्?

घ. वाण्येका पुरुषं समलङ्करोति।

**6. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।** **4**

क. -------- सह लक्ष्मणः वनं गतवान्। (राम)

ख. -------- नमः। (शिव)

ग. -------- उपरि खगाः सन्ति। (वृक्ष)

घ. -------- उभयतः पुत्रौ स्तः। (पितृ)

**7. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ विभज्य संयोज्य वा लिखत।** **4**

क. नवीनः गृहकार्यम् कृत्वा उद्यानं गच्छति।

ख. साक्षी आपणं गम् + क्त्वा फलानि आनयति।

ग. संस्कृतम् अवश्यमेव पठनीयम्।

घ. गृहम् आगत्य गायत्री मातरम् अपृच्छत्।

**8. उचित संख्या पदेन रिक्तस्थानानि पूरयत।** **4**

क. --------- संवत्सराः भवन्ति। (60)

ख. --------- विद्याः भवन्ति। (64)

ग. बस् याने -------- यात्रिणः आसन्। (54)

घ. कपाटिकायां -------- पुस्तकानि सन्ति (73)

**9. कोष्ठकदत्तस्य शब्दस्य उचितरूपं लिखत।** **4**

क. महिला ------- जलम् आनयति। (कूपेन, कूपात्, कूपस्य)

ख. त्वं -------- पश्यसि। (बालकेन, बालकस्य, बालकं)

ग. सः --------- लेखं लिखति। (लेखनी, लेखन्या, लेखन्याः)

घ. रोहनः मृत्तिकया --------- क्रीडति। (शकटी, शकटिकया, शकटेन)

**10. अधोलिखित वाक्यानां लकार परिवर्तनम् करोतु।** **3**

क. अहं प्रतिदिनम् खेलामि। (लङ् लकारे)

ख. तौ गुरून् नंस्यतः। (लट् लकारे)

ग. अम्बा भोजनं पचति। (लृट् लकारे)

**11. मञ्जूषातः उचित अव्ययपदं चित्वा लिखत।** **2**

मञ्जूषा

(मा, कुत्र, बहिः, कुतः, शीघ्रम्)

क. बालकः --------- धावति।

ख. कदापि असत्यं -------- वद।

ग. पथिकः --------- आगतः?

घ. नगरात् -------- सरोवरः अस्ति।

## खण्डः घ – पठित अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

परन्तु अधुना निखिले संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषाम् उपरि स्वकीयं प्रभुत्वं च स्थापयन्ति। संसारे सर्वत्र विद्वेषस्य, शत्रुतायाः , हिंसायाः च भावना दृश्यते। देशानां विकासः अपि अवरुद्धः भवति।

**I. एकपदेन उत्तरयत।** **1**

क. समर्थाः देशाः किं प्रदर्शयन्ति?

ख. देशानां विकासः कीदृशः भवति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

अशान्तेः वातावरणम् कुत्र अस्ति?

**III. भाषिककार्यम्।** **3**

क. 'निजम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

ख. तेषाम् उपरि स्वकीयं इति वाक्यांशे तेषाम् इति पदं कस्मै प्रयुक्तम्?

ग. मित्रतायाः इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥

**I. एकपदेन उत्तरयत।** **1**

क. पुरुषं का समलङ्करोति?

ख. वस्तुतः किम् भूषणम् अस्ति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

पुरुषं किं किं न भूषयन्ति?

**III. भाषिककार्यम्।** **3**

क. 'केशाः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

ख. 'विकसन्ति' इति पदस्य विलोमपदं पद्यांशे किं प्रयुक्तम्?

ग. पद्यांशात् एकम् अव्ययं पदं चित्वा लिखत।

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

डेविडः - आम्! कथं न? ध्वजस्य उपरि स्थितः केशरवर्णः त्यागस्य उत्साहस्य च सूचकः। मध्ये स्थितः श्वेतवर्णः सात्त्विकतायाः शुचितायाः च द्योतकः। अधः स्थितः हरितवर्णः वसुन्धरायाः सुषमायाः उर्वरतायाश्च द्योतकः।

तेजिन्दरः - शुचे! ध्वजस्य मध्ये एकं नीलवर्णं चक्रं वर्तते?

शुचिः - आम् आम्! इदम् अशोकचक्रं कथ्यते। एतत् प्रगतेः न्यायस्य च प्रवर्तकम्। सारानाथे अशोकस्तम्भः अस्ति। तस्मात् एव एतत् गृहीतम्।

**I. एकपदेन उत्तरयत।** **1**

क. ध्वजस्य मध्ये कीदृशं चक्रं वर्तते?

ख. अशोकस्तम्भः कुत्र अस्ति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

हरितवर्णः कस्याः द्योतकः?

**III. भाषिककार्यम्।** **3**

क. सूचकः इत्यस्मिन् अर्थे किं पदं प्रयुक्तम्?

ख. उपरि इत्यस्य विलोमपदं किं प्रयुक्तम्?

ग. एकम् अव्ययपदं नाट्यांशात् चित्वा लिखत।

**15. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरूत।** **4**

क. गुरूणां गुरुः <u>विद्या</u> अस्ति।

ख. शल्यक्रियायाः वर्णनं <u>संस्कृतसाहित्ये</u> अस्ति।

ग. जनाः <u>सर्वकाराय</u> धनं यच्छन्ति।

घ. <u>कृषकाणां</u> गृहेषु हर्षम् जनयाम।

**16. मञ्जूषातः समुचितपदानि चित्वा निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुनः लिखत।** **4**

(यशः, विहीनः, विद्या, धनं, बन्धुजनः, नरस्य, देवता, गुरूणां)

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या विहीनः पशुः।।

अन्वयः - विद्या नाम क. --------- अधिकं रूपम् प्रच्छन्नगुप्तं धनम् अस्ति। ख. ------- भोगकरी च ग. ------- सुखकरी अस्ति। विद्या घ. ------- गुरुः अस्ति। विदेशगमने विद्या ङ. -------- अस्ति। विद्या परा च. -------

अस्ति। राजसु विद्या पूज्यते न हि। विद्या छ. -------- पशुः भवति।

**17. अधोलिखितं कथांशं समुचितक्रमेण लिखत।** **4**

क. काष्ठकूटः तां वीणारवा-नाम्न्याः मक्षिकायाः समीपम् अनयत्।

ख. तस्य विलापं श्रुत्वा काष्ठकूटः नाम खगः भद्रे किमर्थे विलपसि इति अपृच्छत्।

ग. एकदा एकः प्रमत्तः गजः वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्।

घ. तयोः वार्तां श्रुत्वा मक्षिकावदत् - ममापि मित्रं मण्डूकः मेघनादः अस्ति।

ङ. तदानीं तौ मक्षिकाया सह गत्वा मेघनादस्य पुरः सर्वं वृत्तान्तं न्यवेदयताम्।

च. पुरा एकस्मिन् एका चटका वसति स्म।

छ. तेन अण्डानि विशीर्णानि।

ज. चटकावदत् दुष्टेन गजेन मम सन्ततिः नाशिता इति।

**18. अधोलिखितानां शब्दानां पर्याय पदेन सह मेलनं कुरुत।** **3**

| | | |
|---|---|---|
| क. | मन्त्री | नूतनः |
| ख. | मनसि | अमात्यः |
| ग. | नवीनः | चेतसि |